## 24.चतुर्विंशः पाठः
## संस्कृतभाषा

षष्ठी-विभक्तिः

संस्कृतं भारतस्य प्राचीनतमा भाषा अस्ति । एषा देवभाषा इति लोके प्रसिद्धिः । सा च प्रसिद्धिः निर्मूला नास्ति । अस्याः भाषायाः व्याकरणं वैज्ञानिकम् अस्ति । इयं भाषा वेदोपनिषत्शास्त्राणां भाषा अस्ति । इयम् एव भाषा पुराणानां, दर्शनानां च भाषा अस्ति । संस्कृतभाषा अतीव मधुरा अस्ति । अस्माकं भारतीयपरम्परायाः सभ्यतायाः च रक्षणम् अपि संस्कृतभाषया एव भवति । संस्कृति-संस्कृतयोः विशेषः सम्बन्धः अस्ति । "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा" इति सुभाषितं प्रसिद्धम् अस्ति । अस्माकं सर्वकारेण कलियुगाब्दस्य 5201 तमं वर्ष (द्विसहस्रतमः क्रिस्ताब्दः) संस्कृत-वर्षरूपेण घोषितम् आसीत् । प्रतिवर्षं श्रावणपूर्णिमा संस्कृतदिनत्वेन आचर्यते । महाभारत-रामायणयोः कथा अपि संस्कृतेन लिखिता अस्ति । भास-श्रीहर्ष-कालिदासादीनां भाषा अपि संस्कृतम् आसीत् । वेदोपनिषदादयः संस्कृते सन्ति । अद्वितीया भगवद्गीता अपि संस्कृते एव अस्ति । अनेकानि दर्शनानि शास्त्राणि च संस्कृते एव सन्ति । भारतीयचिन्तनस्य सारः एव संस्कृते अस्ति । अतः संस्कृतं भारतस्य सांस्कृतिकभाषा अस्ति ।

सुभाषितानि -

ताराणां भूषणं चन्द्रः नारीणां भूषणं पतिः ।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम् ।। 1 ।।

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निस्पृहस्य तृणं जगत् ।। 2 ।।

तक्षकस्य विषं दन्ते मक्षिकायाः च मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जनस्य तत् ।। 3 ।।